## शास्त्ररत्नाकराणां वेदभाष्यरत्नानां मुल्लैवासल् रा. कृष्णमूर्तिशास्त्रिणाम् आमुखम्

मनुष्यजन्मनः मुख्यं फलं निःश्रेयसप्राप्तिः। तच्च उक्ततत्त्वज्ञानमात्रसाध्यम्। अस्माकं तदेव सर्वेषामभिलषितं च। तादृशतत्त्वज्ञानमेव मनुष्ययत्नानां सर्वेषां परममुद्देश्यम्। श्रीभगवत्पादैः 'दुर्लभं त्रयमेवैतत् दैवानुग्रहहेतुकम्। मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः॥' इति।

ईदृशजन्मलक्ष्यप्राप्तये एकमेव साधनम् औपनिषदं ज्ञानम् इति सर्वसम्मतम्। उपनिषदः वेदप्रविभागेषु अन्यतमाः। मन्त्र- अर्थवाद-ब्राह्मण-उपनिषदः इति वेदप्रविभागः गण्यते। स च सर्वो वेदः काण्डत्रयतया परिगण्यते कर्म-उपासना-ज्ञानकाण्डरूपेण। सम्पूर्णस्य वृक्षस्य फलमेव मुख्योद्देश्यं साध्यं च भवति। तथा सम्पूर्णस्य वेदस्य आत्मज्ञानमेव बोध्यतया फलं भवितुमर्हति यल्लाभेन परमपुरुषार्थः । अत एवोक्तं भगवद्गीतासु 'वेदैश्च सर्वैरहमेव वेद्यः' इति। अत्र श्लोके एवकारः त्रिष्वपि पदेषु वेद-अहं-वेद्यरूपेषु अर्हः। परन्तु ज्ञानकाण्डपदैः साक्षादेव वेद्यं ब्रह्म। उपासनाकाण्डगतानां पदानां लक्षणया व्यञ्जनाख्यध्वनिना वा कथञ्चित् ब्रह्म-तद्गुण-तद्भक्त्युत्पादकार्थपर्यवसायित्वं गीताचार्यसंमतम् इति गम्यते। परन्तु स्थूलदृष्ट्या पदानां वाचकशक्तिं तत्तत्प्रकरणपठितानां वाक्यानां प्रकृतसंबन्धिपदार्थवाचकत्वं केनापि वारयितुं न शक्यते। ध्वनिकाव्येषु अपि वाच्यार्थप्रतीतिः सर्वैर्ध्वनिकारैः स्वीक्रियते एव। तथापि सुदृढपर्यालोचनया तीव्रं समालोचने प्रकृतार्थविलक्षणं चमत्कारकारि लोकोत्तरं च अर्थान्तरं प्रतिभावैचित्र्यात् प्रतीयते एव काव्येषु।

श्रीकृष्णप्रेमिमहाभागानां भक्तिसाम्राज्यचक्रवर्तिनाम् आत्मजैः श्रीरङ्गनाथशर्मभिः एभिः पैतृकीं प्रतिभाम् आजन्मनः प्राप्तवद्भिः समग्रस्य ऋग्वेदस्य प्रतिमन्त्रं बहुलानां पदानां आध्यात्मिकार्थपरत्वं प्रायः कोशनिरुक्ताद्युदाहरणपूर्वकं सूचितम्। सोऽयम् एतेषां परिश्रमः सर्वैरपि आपण्डितपामरं श्लाघनीयः इत्यत्र नास्ति संशयावकाशः। एतादृशं विलक्षणं वैदुष्यम् 'इति रामपदेनैव परं ब्रह्माभिधीयते' इति पद्योक्तस्य श्रीरामचन्द्रपरब्रह्मणः असीमकृपया भागवतोत्तमपरम्पराप्राप्तजनुष्ट्वेन च दायतया लब्धम् इति कथनं नानुचितम् इति चिन्तये। ग्रन्थरत्नमिदं सर्वेषां तत्त्वजिज्ञासूनां महान्तम् उपकारं अध्यात्मचिन्तनाख्ये प्रकाशे औज्वल्यं च प्रददातु इति श्रीजानकीजानिं सम्प्रार्थयन् एतेषां सम्पूर्णं सौभाग्यं च दातुं समं सोमं च अभ्यर्थये।